# CAMBRIAN PUBLIC SCHOOL

**KANKE ROAD, RANCHI**

**Revision Assignment - 2**

**Subject: Sanskrit** **Class: IX**

1) **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृततेन लिखतः**

(क) मातामही बहुवारम् उपनेत्रं कपाटिकायां त्यजति स्म। उपनेत्रं कपाटिकायाम् अपि न आसीत् ।उपनेत्रम् अन्वेष्टुं रमा पर्यङ्कस्य अधः प्रविष्टा। पर्यङ्कस्य अधः मुनमुनः उपविष्टः आसीत् । मुनमुनस्य पादयोः मध्ये किमपि आसीत्।तत् सम्यक् न दृश्यते स्म ।रमा मुनमुनं बहिः अकरोत्। मुनमुनेन सह मातामह्याः उपनेत्रम् अपि आगतम् ।रमा सत्वरम् उपनेत्रं गृहीतवती ।

I. एकपदेन उत्तरत –

(क) कस्य अधः मुनमुनः उपविष्टाः आसीत् ?

(ख) उपनेत्रं कस्य पादयोः मध्ये आसीत् ?

II. पूर्णवाक्येन उत्तरत –

(क) उपनेत्रम् अन्वेष्टुं रमा किम् अकरोत्।

III. भाषिक-कार्यम् –

(i) 'उपनेत्रं कपाटिकायाम् अपि न आसीत् ।' अत्र क्रियापदं किम्?

(ii) 'अकरोत्' इति क्रियाया: कर्तृपदं किम् अस्ति?

(क) रमा (ख) मुनमुनं (ग) बहिः (घ) किमपि न

(ख) एषा रमायाः मातामही अस्ति। रमायाः मातामही सर्वदा उपनेत्रं धारयति। मातामह्याः पुस्तकानां पठने अभिरुचिः अस्ति। मातामही प्रतिदिनं प्रातः वार्तापत्रं पठति। एकस्मिन् दिने मातामही प्रातः एवं रमाम् उत्थापयितुं प्रयासम् अकरोत्। मातामही उपनेत्र न लभते स्म। उपनेत्रं विना मातामही कष्टम् अनुभवति स्म। सा आवश्यकानि वस्तूनि अन्वेष्टु समर्था न आसीत्। रमा गाढनिद्रायाम् आसीत्। सा निद्रां न त्यजति स्म। मातामही रमाम् अति-स्नेहेन उत्थापितवती।

I. एकपदेन उत्तरत –

(i) मातामही किम् धारयति?

(ii) रमा कीदृशी निद्रायाम् आसीत्?

II. पूर्णवाक्येन उत्तरत –

(i) मातामह्याः कस्यां पठने अभिरुचिः आसीत्?

(ii) उपनेत्रं विना मातामही कीदृशम् अनुभवति स्म?

III. भाषिक-कार्यम् –

(i) 'पठति' इति क्रियापदस्य कर्ता कः?

(ii) 'अकरोत्' इति क्रियापदस्य लकारः कः?

**2)** अधोलिखित-रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुतl

| | |
|---|---|
| i) उपनेत्रं धृत्वा **<u>मुनमुन</u>**: शोभनः दृश्यते स्म ? | (कः / का ) |
| ii) एषा **<u>रमायाः</u>** मातामही अस्ति। | (कस्य/कस्याः) |
| iii) उपनेत्रं **<u>स्नानागारे</u>** अपि न आसीत् । | (कुत्र / क:) |
| iv) रमायाः मातामही सर्वदा **<u>उपनेत्रं</u>** धारयति। | (किम्/कः) |
| v) अहं **<u>साधुताव्रतं</u>** दधामि । | (किम् / का) |
| vi) अहं **<u>कीर्तिसत्कथां</u>** सृजामि | (काम् / कम्) |
| vii) मातामह्याः **<u>पुस्तकानां</u>** पठने अभिरुचिः अस्ति। | (केषाम् / कासाम्) |
| viii) मातामही **<u>प्रतिदिनं</u>** प्रातः वार्तापत्रं पठति। | (कदा / कुत्र) |

**3)** 'स्म' इत्यस्य प्रयोगेण वर्तमानकालवाक्यानां भूतकालवाक्येषु परिवर्तनं कुरु ।

i) सर्वदा उपनेत्रं **धारयति।**

ii) सा वार्तापत्रं **पठति।**

iii) रमा उपनेत्रम् **अन्विष्यति** ।

iv) मातामही उपनेत्रं **त्यजति** ।

v) स: मातरं **नमति** ।

vi) सा शुभं **करोति** ।

vii) रमा प्रयासम् **करोति।**

viii) सा निद्रां न **त्यजति** ।

**•उपर्युक्त सभी प्रश्नों के उत्तर संस्कृत कांपी में लिखिए ।**

**********